॥ तृतीयॊऽध्यायः ॥

शुभॆन कर्मणा स्वर्गं निरयं च विकर्मणा ।
मिथ्याज्ञानॆन च तमॊ ज्ञानॆनैव परं पदम ॥ १ ॥

याति तस्माद्विरक्तः सन ज्ञानमॆव समाश्रयॆत ।
सर्वावस्थाप्रॆरकश्च सर्वरूपॆष्वभॆदवान ॥ २ ॥

सर्वदॆशॆषु कालॆषु स ऎकः परमॆश्वरः ।
तद्भक्तितारतम्यॆन तारतम्यं विमुक्तिगम ॥ ३ ॥

सच्चिदानंद आत्मॆति मानुषैस्तु सुरॆश्वरैः ।
यथाक्रमं बहुगुणैर्ब्रह्मणा त्वखिलैर्गुणैः ॥ ४ ॥

उपास्यः सर्ववॆदैश्च सर्वैरपि यथाबलम ।
ज्ञॆयॊ विष्णुर्विशॆषस्तु ज्ञानॆ स्यादुत्तरॊत्तरम ॥ ५ ॥

सर्वॆऽपि पुरुषार्थाः स्युर्ज्ञानादेव न संशयः ।
न लिप्यतॆ ज्ञानवांश्च सर्वदॊषैरपि क्वचित ॥ ६ ॥

गुणदॊषैः सुखस्यापि वृद्धिह्रासौ विमुक्तिगौ ।

www.yousigma.com

नृणां सुराणां मुक्तौ तु सुखं क्लृप्तं यथाक्रमम ॥ ७ ॥

॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचित ब्रह्मसूत्राणुभाष्यॆ तृतीयॊऽध्यायः ॥

www.yousigma.com